इति वैद्यकद्रव्यगुणः ।)

इन्दुकः, पुं, (इन्दुरिव शुक्लत्वात् । इन्दु+कन् ।) अश्मन्तकवृक्षः । इति राजनिर्घण्टः ॥

इन्दुकमलं, क्ली, (इन्दुश्चन्द्र इव शुभ्रं कमलं ।) सितोत्पलं । इति राजनिर्घण्टः ॥

इन्दुकलिका, स्त्री, (इन्दुरिव शुक्ला कलिका यस्याः ।) केतकी । इति राजनिर्घण्टः ॥ (केतकीशब्देऽस्या विशेषो ज्ञेयः ।)

इन्दुकान्तः, पुं, (इन्दुः कान्तः प्रियो यस्य । चन्द्रोदयेऽयं निष्यन्दतीतिभावः ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥

इन्दुकान्ता, स्त्री, (इन्दुः कान्तो यस्याः ।) रात्रिः । इति हेमचन्द्रः ॥

इन्दुजनकः, पुं, (इन्दोर्जनकः ।) समुद्रः । इति त्रिकाण्डशेषः । (समुद्रात् चन्द्रोत्पत्तिकथा भारते आदिपर्व्वणि अष्टादशाध्याये द्रष्टव्या । यथा, —

"ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात् ।
प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः" ॥ ३४ ॥)

इन्दुजा, स्त्री, (इन्दोर्जायते या । इन्दु+जन्+ड ।) नर्म्मदा नदी । इति हेमचन्द्रः । नर्व्वदा इति ख्याता । (इयं च प्रतीच्यामवन्तिषु स्थिता प्रत्यक् स्रोतोवहा च । यथा, —

"अवन्तिषु प्रतीच्यां वै कीर्त्तयिष्यामि ते दिशि ।
यानि तत्र पवित्राणि पुण्यान्यायतनानि च ॥
प्रियङ्ग्वाम्रवनोपेता वानीरफलशालिनी ।
प्रत्यक्स्रोता नदी पुण्या नर्मदा तत्र भारत" ॥
इति भारते आदिपर्व्वणि ८९ अध्यायः ।)

इन्दुपुत्त्रः, पुं, (इन्दोः पुत्त्रः ।) बुधग्रहः । इति शब्दरत्नावली ॥

इन्दुपुष्पिका, स्त्री, (इन्दुरिव शुभ्रं पुष्पं यस्याः ।) कलिकारीवृक्षः । इति राजनिर्घण्टः ॥ विषलाङ्गला इति भाषा ।

इन्दुभृत्, पुं, (इन्दुं बिभर्त्तीति । इन्दु+भृ+क्विप् ।) शिवः । इति हेमचन्द्रः ॥

इन्दुमती, स्त्री, (इन्दुः पूर्णेन्दुर्विद्यते यस्याः । इन्दु+मतुप् ।) पूर्णिमा इति राजनिर्घण्टः ॥ (इन्दुमती पूर्णिमेव आनन्ददायिका स्वनामख्याता विदर्भराजभगिनी, अजराजपत्नी । यथा, — रघुः ।

"अथेश्वरेण क्रथकैशिकानां
स्वयंवरार्थं स्वसुरिन्दुमत्याः" । ५ । ३९ ।
"वसुधामपि हस्तगामिनी-
मकरोदिन्दुमतीमिवापराम्" । ८ । १ ।)

इन्दुरत्नं, क्ली, (इन्दुरिव शुभ्रं रत्नम् ।) मुक्ता । इति राजनिर्घण्टः ॥

इन्दुलेखा, स्त्री, (इन्दोश्चन्द्रस्य लेखेव ।) अमृता । सोमलता । शशिकला । इति मेदिनी । यमानिका इति शब्दमाला ॥

इन्दुलोहकं, क्ली, (इन्दुलोह+कन् ।) रौप्यं । इति राजनिर्घण्टः ।

इन्दुवल्ली, स्त्री, (इन्दोर्वल्ली लता ।) सोमलता । इति जटाधरः ॥ (सोमलताशब्देऽस्या गुणादयो व्याख्येयाः ।)

इन्दुव्रतं, क्ली, (इन्दवे इन्दुलोकार्थं वा व्रतं ।) चान्द्रायणव्रतं । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते ॥)

("इन्दुव्रतसहस्रं तु यश्चरेत् कायशोधनम् ।
पिबेत् यश्चापि गङ्गाम्भः समौ स्यातां न वा समौ")

इन्दूरः, पुं, मूषिकः । इति जटाधरः । इँदुर इति भाषा ॥ (गणेशवाहनं । इति पुराणम् ।)

इन्द्रः, पुं, (इन्दतीति । इदि परमैश्वर्य्ये तस्मात् रन् प्रत्ययः ।) देवराजः । स तु अदितिपुत्त्रः । पूर्व्वदिक्पतिश्च । तस्य भार्य्या शची । पुत्त्राः जयन्तः १ ऋषभः २ मीढुांश्च ३ । अस्त्रं वज्रं । वाहनं ऐरावतः । पुरी अमरावती । वनं नन्दनं । तत्पर्य्यायः । मरुत्वान् २ मघवा ३ बिड़ौजाः ४ पाकशासनः ५ वृद्धश्रवाः ६ सुनासीरः ७ पुरुहूतः ८ पुरन्दरः ९ जिष्णुः १० लेखर्षभः ११ शक्रः १२ शतमन्युः १३ दिवस्पतिः १४ सुत्रामा १५ गोत्रभित् १६ वज्री १७ वासवः १८ वृत्रहा १९ वृषा २० वास्तोष्पतिः २१ सुरपतिः २२ बलारातिः २३ शचीपतिः २४ जम्भभेदी २५ हरिहयः २६ स्वाराट् २७ नमुचिसूदनः २८ संक्रन्दनः २९ दुश्च्यवनः ३० तुराषाट् ३१ मेघवाहनः ३२ आखण्डलः ३३ सहस्राक्षः ३४ ऋभुक्षा ३५ । इत्यमरः । महेन्द्रः ३६ कौशिकः ३७ पूतक्रतुः ३८ विश्वम्भरः ३९ हरिः ४० पुरन्दंशा ४१ शतधृतिः ४२ पृतनाषाड् ४३ अहिद्विषः ४४ । इति जटाधरः ॥ वज्रपाणिः ४५ देवराजः ४६ पर्व्वतारिः ४७ पर्य्यण्यः ४८ देवताधिपः ४९ नाकनाथः ५० पूर्व्वदिक्पतिः ५१ पुलोमारिः ५२ अर्हः ५३ प्राचीनबर्हिः ५४ तपस्तक्षः ५५ । इति शब्दरत्नावली । तस्य चतुर्द्दश नाम भेदा यथा ।

"इन्द्रश्च विश्वभुग् ज्ञेयो विपश्चित्तदनन्तरम् ।
विभुः प्रभुः शिखिश्चैव तथैव च मनोजवः ।
तेजस्वी साम्प्रतस्त्विन्द्रो बलिर्भाव्यस्त्वनन्तरम् ॥
अद्भुतस्त्रिदिवश्चैव दशमस्त्विन्द्र उच्यते ।
सुशान्तिश्च सुकीर्त्तिश्च ऋतधामा दिवस्पतिः ।
इति भूता भविष्याश्च इन्द्रा ज्ञेयाश्चतुर्द्दश" ॥
इति देवीपुराणे कालव्यवस्थाध्यायः ।

विष्कुम्भादिसप्तविंशतियोगान्तर्गतषड्विंशयोगः । तत्र जातफलम् ।

"प्रतापशीलो बलवान् गुणाढ्यः
श्लेष्माधिकः श्रीकमलाभ्युपेतः ।
किलेन्द्रयोगो यदि जन्मकाले
महेन्द्रतुल्यः पुरुषः प्रसन्नः" ।

इति कोष्ठीप्रदीपः ॥ * ॥ अन्तरात्मा आदित्यविशेषः । इति मेदिनी (यथा, हरिवंशे ।

"तत्र शक्रश्च विष्णुश्च जज्ञाते पुनरेव ह" ।)

कुटजवृक्षः । रात्रिः । इति धरणी ॥ उपद्वीपविशेषः । इति शब्दमाला ॥ परमेश्वरः । इति वेदान्तः ॥ ("इन्द्रो मायाभिः पुरुरूप ईयते" इति श्रुतिः ॥ इन्द्रियं । श्रेष्ठः । प्रथमः । यथा, नरेन्द्रो राजा । पक्षीन्द्रो गरुड़ः । इत्यादिः ।)

इन्द्रकं, क्ली, (इन्द्रस्य ऐश्वर्य्यशालिनः कं सुखं यस्मिन् ।) सभागृहम् । तत्पर्य्यायः । आस्थानगृहं २ । इति हेमचन्द्रः ॥

इन्द्रकीलः, पुं, (इन्द्रस्य कील इव ।) मन्दरपर्व्वतः । इति हेमचन्द्रः ॥ (यथा रामायणे ३ । ८० । १८ ।

"तत्रेन्द्रकीलप्रतिमाः प्रतोलिवरशोभिताः ।)

इन्द्रकुञ्जरः, पुं, (इन्द्रस्य कुञ्जरः ।) ऐरावतहस्ती । इति जटाधरः ॥

इन्द्रकोषः, पुं, (इन्द्रस्य ऐश्वर्य्यशालिनः कोषः ।) मञ्चः । खट्वा । इति त्रिकाण्डशेषः ॥ तमङ्गकः । इति हेमचन्द्रः । घोभ्भला गोँजला इत्यादिख्यातः । निर्यूहोऽपि । यथा, महेश्वरः ।

"निर्यूहः शेखरे द्वारे निर्यासे नागदन्तके" ।

इन्द्रगोपः, पुं, (इन्द्रो गोपो रक्षको यस्य ।) रक्तवर्णकीटविशेषः । मखमली इति भाषा । तत्पर्य्यायः । अग्निरजः २ वैराटः ३ तितिभः ४ अग्निकः ५ इति हेमचन्द्रः । शक्रगोपः ६ वर्षाभूः ७ रक्तवर्णः ८ । इति राजनिर्घण्टः ॥ ("अविरलवितरेवहीन्द्रगोपैः" । इति किराते । १० । ३ ।)

इन्द्रचन्दनं, क्ली, (इन्द्रस्य चन्दनं वृक्षविशेषः ।) हरिचन्दनम् । इति राजनिर्घण्टः ॥

इन्द्रचिर्भिटी, स्त्री, लताविशेषः । तत्पर्य्यायः । इन्दीवरा २ युग्मफला ३ दीर्घवृन्ता ४ उत्तमारणी ५ पुष्पमञ्जरिका ६ द्रोणी ७ करम्भा ८ नलिका ९ । अस्या गुणाः । कटुत्वं । शीतत्वं । पित्तश्लेष्मकासदोषव्रणकृमिनाशित्वं । चक्षुर्हितकारित्वञ्च । इति राजनिर्घण्टः ॥

इन्द्रच्छन्दः, [स्] क्ली, (इन्द्र इव सहस्रगुच्छेन छाद्यते इति । इन्द्र+छद्+असुन् । निपातनात् सिद्धं) सहस्रगुच्छहारः । इति हेमचन्द्रः ॥

इन्द्रजालं, क्ली, (इन्द्राणामिन्द्रियाणां जालं आवरकम् । यद्वा इन्द्रस्य परमेश्वरस्य जालं माया इव ।) मायाकर्म्म । भोजवाजि; भेल्कि इत्यादि भाषा । तत्पर्य्यायः । कुहकं २ जालं ३ कुसृतिः ४ । तद्विवरणग्रन्थो यथा, —

"अथातः संप्रवक्ष्यामि चेन्द्रजालमनुत्तमम् ।
व्याधिदारिद्र्यहरणं जराम्लत्वविनाशनम् ।
इन्द्रस्य यो न जानाति जालेशं रुद्रभाषितम् ।
निग्रहानुग्रहे तस्य का शक्तिः परमेश्वरि ! ॥
न तेषां जायते सिद्धिर्गोत्रे क्षेत्रे गृहेऽपि वा ।
इन्द्रजालं न जानाति स क्रुद्धः किं करिष्यति ॥
न जीवति वरारोहे संसारे दुःखसागरे ।
इन्द्रजालं न जानाति कुतः सौख्यं भवेत्ततः ॥
कौतूहलं कुतस्तेषां कुतः कामा वरानने ! ।
संसारसागरे घोरे कामलुब्धाश्च मानवाः ।
रुद्रकर्म्म न हि तेषां कुतः सौख्यं विधीयते ॥
यथा नदीनदाः सर्व्वे सागरे समुपागताः ।
तथा सर्व्वाणि शास्त्राणि इन्द्रजालस्थितानि च ॥
तप्तानाञ्च यथा भानुः शीतलानां यथा शशी ।
गम्भीराणां यथा सिन्धुर्जालेन्द्रश्च तथा प्रिये ! ॥
तथा किं बहुनोक्तेन वर्णनेन पुनः पुनः ।
जालेन्द्रस्य समं शास्त्रं न भूतं न भविष्यति" ॥ ॥
"अथातः संप्रवक्ष्यामि औषधीनां विधिं वरे ।
येन विज्ञानमात्रेण सर्व्वसिद्धिर्भविष्यति ॥
महाकालस्य बीजानि प्रस्थमेकं समाहरेत् ।